**क्रमिघ्न** न० कृमिं हन्ति हन–ट १विडङ्गे रत्नमा०। २कृमिनाशकमात्रे त्रि० स्त्रियां ङीप्।

**क्रमिज** न० कृमिभ्यो जायते जन–ड १अगुरुचन्दने अमरः २लाक्षायां स्त्री रत्नमाला०

**क्रमिशत्रु** पु० कृमेः शत्रुरिव। विडङ्गे रत्नमाला

**क्रमु** पु० क्रम उन्। गुवाके द्विरूपकोषः

**क्रमुक** पु० क्रम–उन संज्ञायां कन्। १पट्टिकालोध्रे २गुवाकवृक्षे ३ब्रह्मदारुवृक्षे च अमरः ४भद्रमुस्तके ५कार्पासिकाफले न० मेदि० अयं सालसारादिगणे सुश्रुते उक्तः "सालसाराजकर्णखदिरकदरकालस्कन्धक्रमुकेत्याद्युक्त्वा "सालसारादिरित्येष गणः कुष्ठविनाशनः। मेहपाण्डामयहरः कफमेदोविशोषणः" सुश्रु० तद्गुणा उक्ताः "आस्वादितार्द्रक्रमुकाः समुद्रात्" माघः गौरा० ङीष्। ६गुवाके स्त्री शब्दरत्नमाला

**क्रमेतर** त्रि० ५त०। क्रमात् वेदपाठप्रकारभेदात् भिन्ने। ततः उक्था० तद्वेत्त्यधीते वा ठक्। क्रामेतरक तद्वेत्तरि तदध्येतरि च त्रि०

**क्रमेल** पुंस्त्री० क्रामति क्रम–विच् एलति अच् कर्म०। उष्ट्रे स्वार्थे क। तत्रार्थे। उभयत्र जातित्वात् ङीष्।

**क्रय** पु० क्री–भावे अच्। पणपूरणादिमूल्यदानेन विक्रेतुः स्वत्वापनयनेन स्वत्वापादनव्यापारे (केना)। प्रतिरूपद्रव्यदानेन तथाचरणे तु न क्रयव्यवहारः इत्यतः द्रव्यपदमनुक्त्वा पणपूरणेत्युक्तम्। क्रयस्य स्वत्वहेतुत्वञ्च पूर्वस्वामिस्वत्वनाशादेव भवति सति तत्स्वत्वे सजातीयस्वत्वं प्रति सजातीयस्वत्वस्य प्रतिबन्धकत्वेन क्रेतुः स्वत्वोत्पत्त्यभावात् अतोमूल्यदानेन तत्स्वत्वापाकरणम्। तस्य च स्वत्वहेतुत्वम् "सप्त वित्तागमा धर्म्याः दायो लाभः क्रयो जयः। विभागः संप्रयोगश्च सत्प्रतिग्रह एव च" स्मृतेः "स्वामी रिक्थक्रयसंविभागपरिग्रहाधिगमेषु" गोतमस्मरणाच्च। क्रयादिरूपागमसहितभोगस्यैव स्वत्वे प्रामाण्यं वीरमि० व्यवस्थापितं यथा

"सप्त स्थावरागमोपायान् प्रदर्श्य तत्र भुक्तेः प्रामाण्यमाह वृहस्पतिः। विद्यया क्रयबन्धेन शौर्य्यभार्य्यान्वयागतम्। सपिण्डस्याप्रजस्यांशं स्थावरं सप्तधा मतम्। पित्र्यलब्धक्रयाधाने रिक्थशौर्य्यप्रवेदनात्। प्राप्ते सप्तविधे भोगः सागमः सिद्धिमाप्नुयात्"।

विद्यया प्रतिग्रहादिकमयोजिकया, स्वत्वोपायः क्रयः प्रसिद्धः। बन्धो बन्धकं सोपाधिकस्वत्वहेतुर्न त्ववधौ चात्यन्तिकस्वत्वहेतुस्तदग्रे तरत्र विवेचनीयम्। क्रयबन्धेनेति समाहारद्वन्द्व एकत्वम्। शौर्य्यागतं युद्धार्जितम्। भार्य्यागतं विवाहकाले प्राप्तम्। अन्वयागतं पितामहादिक्रमोपात्तम्। अप्रजस्य सपिण्डस्यांशं रिक्थहरान्तराभावे पिण्डदानाद्यधिकारितया प्राप्तम्। पित्र्येत्यादिना प्रागुक्तानेव सप्तस्थावरागमोपायाननूद्य तत्र भोगस्य प्रामाण्यं विधीयते। तत्र प्रवेदनं विवाहः। स एव "क्रमागतः शासनिकः क्रयाधानागमान्वितः। एवं विधस्तु यो भोगः स तु सिद्धिमवाप्नुयात्। संविभागक्रयप्राप्तं पित्र्यलब्धञ्च राजतः। स्थावरं सिद्धिमाप्नोति भुक्त्या हानिमुपेक्षया। प्राप्तमात्रं येन भुक्तं स्त्रीक्रयापरिपन्थिनम्। तस्य तत्सिद्धिमाप्नोति हानिश्चोपेक्षया तथा। अध्यासनात् समारभ्य भुक्तिर्यस्याविघातिनी। त्रिंशद्वर्षाण्यविच्छिन्ना तस्य तां न विचालयेत्"।

मूल्यं दास्यामीति नियमं कृत्वाऽपि ग्रहणादपि क्रयसिद्धिः यथाह विवादचि० कात्या० "पण्यं गृहीत्वा यो मूल्यमदत्त्वैव दिशं व्रजेत्। ऋतुत्रयस्योपरिष्टात्तद्धनं वृद्धिमाप्नुयात्" अत्र विषये लेख्यपत्रकरणमाह वृहस्पतिः "गृहक्षेत्रादिकं क्रीत्वा तुल्यमूल्याक्षरान्वितम्। पत्रं कार्यते यत्तु क्रयलेख्यं तदुच्यते"। तस्यानुशयकालश्च अनुशयशब्दे दर्शितः"। वैदिककर्माङ्गपरिक्रयादौ प्रायेण यजमानस्यैवाधिकारः यथाह क्रयाधिकरणे जै०सू०भा०

"स्वामिकर्म परिक्रयः कर्मणस्तदर्थत्वात्" ३।८।१ सू०।

"अस्ति परिक्रयः ज्योतिष्टोमे "द्वादशशतं दर्शपूर्णमासयोः अन्वाहार्यम्"। तत्र सन्देहः किम् अध्वर्युणा परिक्रेतव्या ऋत्विजः, उत स्वामिना? इति। किं प्राप्तम्? समाख्यानात् अध्वर्युणा, इति प्राप्ते ब्रूमः, 'स्वामिकर्म परिक्रयः' कस्मात्? कर्मणः तदर्थत्वात्, फलकामो हि यजमानः यस्य फलकामः, तेन स्वयं कर्त्तव्यम्, स यदि परिक्रीणीते, ततः स्वयं सर्वं करोति इति गम्यते, अथ न परिक्रीणीते, न सर्वं कुर्यात्। तस्मात् स्वामी परिक्रीणीते इति" शवरभाष्यम्

"वचनादितरेषां स्यात्" २सू०

"किम् एष एवोत्सर्गः? न इत्युच्यते,–'वचनात् इतरेषां स्यात्'। यत्र वचनं भवति, तत्र वचनप्रामाण्यात् भवति परिक्रयः,–'य एतामिष्टकाम् उपदध्यात् स त्रीन् वरान् दद्यात्' इति" भा०।

सोमादिक्रयस्य द्रव्यसाध्यतया स्त्रीणां पिता विक्रीतत्वात्